SEMESTER - III (GEN)

SANGCOR03T, DSC-1C
SEC-B Abhijñānaśakuntalam (অভিজ্ঞানশকুন্তলম্)

## Explain In Sanskrit

**(1) বলবদপি শিক্ষিতানামাত্মন্যপ্রত্যয়ং চেতঃ**

সাধারণজনাপেক্ষয়া শিক্ষিতজনানাং চিত্তং সর্বথা বলবদ্ ইতি নিশ্চিতম্। তে সর্বমেব কার্যং সুষ্ঠু সম্পাদয়িতুম্ অর্হন্তি। তত্র নাস্তি কশ্চিৎ সন্দেহাবসরঃ। তেষাং কার্যক্ষমতায়া উপরি অন্যেষাং জনানাং বিশ্বাসঃ অস্তি। পরন্তু ক্বচিৎ কেষুচিদ্ বিষয়েষু তেষাম্ আত্মতুষ্টেরুপরি কস্যচিৎ সাফল্যং নির্ভরশীলং ভবেৎ, তদৈব এতদ্ দৃশ্যতে। অভিজ্ঞানশকুন্তলম্ ইতি নাটকস্য সূত্রধারঃ নাট্যকলাপ্রয়োগবিষয়ে অতীব কুশলঃ। সুষ্ঠু প্রয়োগবিজ্ঞানেন স নাট্যং পরিচালয়তি। তত্র নাস্তি সন্দেহঃ। তথাপি স সমবেতানাম্ রঙ্গপ্রেক্ষকানাং পরিতোষবিধানার্থং প্রতিপাত্রং যত্নম্ আধাতুং তস্য পত্নীং নির্দেশং দত্তবান্। সূত্রধারঃ নাট্যপরিচালনবিষয়ে কুশলোঽপি রঙ্গপ্রেক্ষকাণাম্ অপরিতোষং তস্য প্রয়োগবিজ্ঞানং সাধু ন মন্যতে। অতঃ - 'বলবদপি শিক্ষিতানামাত্মন্যপ্রত্যয়ং চেতঃ' ইতি।

---

**(2) ন প্রভাতরলং জ্যোতিরুদেতি বসুধাতলাৎ :-**

পৃথিব্যাঃ সর্বমেব বস্তুজাতং কার্যকারণসম্পর্কেন অন্বিতম্। অতঃ নিয়মানুসারেণ এতৎ সর্বং প্রচলতি। কদাপি তস্য ব্যতিক্রমঃ ন দৃশ্যতে। নির্দিষ্টাৎ কারণাৎ নির্দিষ্টং কার্যমেব উৎপদ্যতে। প্রভাতরলং জ্যোতিঃ বিদ্যুতঃ অর্চিনম্। আকাশস্য মেঘাদেব সা উৎপদ্যতে, পৃথিবীপৃষ্ঠাৎ কদাপি তস্যাঃ উৎপত্তিঃ ন সম্ভবেৎ।

অভিজ্ঞানশকুন্তলম্ ইতি নাটকস্য নায়িকা অপরূপা লাবণ্যবতী। পার্থিবানাং নারীণাং সর্বৈঃ ইদং

লাবণ্যং ন সম্ভবেৎ। শকুন্তলা অপ্সরসঃ মেনকায়াঃ গর্ভজাতা কন্যা। মর্ত্যলোকস্য মহাপ্রভাবশালী মহর্ষিঃ বিশ্বামিত্রঃ তস্যাঃ জনকঃ। স্বর্গস্য সৌন্দর্যং তথা মর্ত্যলোকস্য তপস্যা তস্যাং মূর্তত্বাৎ সা এবং লাবণ্যময়ীরূপেণ প্রস্ফুটিতা। অতঃ সুষ্ঠু উক্তং — 'ন প্রভাতরলং জ্যোতিরুদেতি বসুধাতলাৎ' ইতি।

---

③ অথবা ভবিতব্যানাং দ্বারাণি ভবন্তি সর্বত্র :-

পৃথিব্যাঃ সর্বমেব বৃত্তান্তজাতং কার্যকারণসম্পর্কেন অন্বিতম্। বিনা কারণং ন কিঞ্চিদপি সংঘটতে। তথাপি সন্তি কেচিদ্ বিষয়াঃ যেষু কার্যকারণসম্পর্কং ন অনুভূয়তে। তত্র ঈশ্বরঃ বিধাতা বা স্বীক্রিয়তে। অস্য ব্যাপারস্য নাম এব ভবিতব্যতা। অর্থাৎ যৎ খলু বিধিনির্দিষ্টং তদেব ভবিতব্যম্। বাধাশতেনাপি তৎ অবশ্যমেব ভবিষ্যতি।

হস্তিনাপুরস্য রাজা দুষ্যন্তঃ কণ্বাশ্রমে প্রবেশকালে বাহুস্পন্দনম্ অনুভূতবান্। বাহুস্পন্দনে বরস্ত্রীলাভঃ স্যাদ্ ইতি প্রসিদ্ধিঃ। আশ্রমং হি শমপ্রধানম্। তত্র বাহুস্পন্দনস্য ফলং কথং সম্ভবেৎ ইতি আশঙ্ক্য তস্য সমাধানরূপেণ দুষ্যন্ত এবম্ আহ। আশ্রমঃ শমগুণসম্পন্নোঽপি তত্র স্ত্রীলাভঃ ন অসম্ভবঃ ইতি, যতঃ যৎ বিধিনা আদৌ স্থিরীকৃতং তস্য সংঘটনস্য উপায়াঃ সর্বত্রৈব বিদ্যন্তে। অর্থাৎ তস্য বাহুস্পন্দনস্য ফলম্ অবশ্যমেব লব্ধব্যম্ ইতি মনসি কৃত্বা আহ দুষ্যন্তঃ — 'অথবা ভবিতব্যানাং দ্বারাণি ভবন্তি সর্বত্র' ইতি।

---

Scanned by CamScanner

④ কিমিব হি মধুরাণাং মণ্ডনং নাকৃতীনাম্ :- 1.18 নং শ্লোক

যৎ খলু স্বভাবসুন্দরং তস্য অন্যেন বস্তুনা সৌন্দর্যবিধানম্ অকিঞ্চিৎকরমেব । অসুন্দরবস্তুনঃ সন্নিধানে অপি তস্য সৌন্দর্যহানিঃ ন জায়তে, অপি তু বৃদ্ধিং গচ্ছতি । পদ্মং সুন্দরং, শৈবালেন অনুবিদ্ধমপি তৎ রমণীয়ম্ । চন্দ্রে কলঙ্কমস্তি । মলিনমপি তৎ চন্দ্রস্য শোভাং বর্ধয়তি । অভিজ্ঞানশকুন্তলস্য নায়িকায়াঃ শকুন্তলায়াঃ শরীরলাবণ্যম্ অপার্থিবম্ । বল্কলং ন তস্যাঃ উপযুক্তম্ । তথাপি তেন বল্কলেনৈব শকুন্তলা অধিকং মনোহারিণী সঞ্জাতা । অতঃ নিসর্গতঃ সুন্দরবস্তুনঃ আত্মনিরপেক্ষসৌন্দর্যস্য নাস্তি প্রয়োজনম্ । সুন্দরম্ অসুন্দরম্ বা যদেব বস্তু তেন সহ যুক্তং ভবেৎ তদেব তস্য অলঙ্কারশোভাং তনোতি ইতি । অতঃ সুষ্ঠু উক্তম্ — 'কিমিব হি মধুরাণাং মণ্ডনং নাকৃতীনাম্' ইতি ।

---

⑤ সতাং হি সন্দেহপদেষু বস্তুষু প্রমাণমন্তঃকরণপ্রবৃত্তয়ঃ

সজ্জনানাং মনঃ সর্বথা নির্মলং পবিত্রং চ । সন্দেহাস্পদেষু বিষয়েষু সন্দেহনিরাকরণায় তেষাম্ অন্যপ্রমাণেন প্রয়োজনং নাস্তি । সাধারণজনানাং কস্মিংশ্চিদ্ বিষয়ে সন্দেহে জাতে মহাপুরুষাণাং পন্থা এব অনুসর্তব্যঃ । অত এব তে নিশ্চয়তাং প্রাপ্নুবন্তি । কিন্তু সজ্জনানাম্ অন্তঃকরণপ্রবৃত্তয়ঃ এব অত্র প্রমাণম্ । তে আত্মবোধানুসারেণ এব কার্যং কুর্বন্তি । অন্যপ্রমাণাপেক্ষয়া তেষাম্ অন্তঃকরণম্ অধিকং বলবদিতি ।

রাজর্ষিঃ দুষ্যন্তঃ শকুন্তলাব্যাপারে 'কিমিয়ং কুলপতেরসবর্ণক্ষেত্রসম্ভবা ন বেতি' সংশয়ং প্রকাশয়তি স্ম । তৎপরমেব তস্য শঙ্কা নিরস্তা । যতঃ দুষ্যন্তস্য আর্যং মনঃ তস্যাম্ অভিলাষি বর্তত। ন হি পরিহার্যে বস্তুনি পৌরবাণাং মনঃ ভবতি । অতএব দুষ্যন্তস্য মনসঃ অভিলাষিত্বাৎ শকুন্তলা অবশ্যমেব তস্য পরিণয়যোগ্যা ইতি ।

---

Scanned by CamScanner